योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य उत्तरार्धम्)/सर्गः ०२३

त्रयोविंशः सर्गः २३

श्रीवसिष्ठ उवाच ।

विरागवासनापास्तसमस्तभववासनः ।

उत्थाय गच्छ प्रकृतेरस्या मङ्किरिवाङ्कितः ।। १

मङ्किर्नामाभवत्पूर्वं ब्राह्मणः संशितव्रतः ।

स कथं श्रृणु निर्वाणमाप्तवान्मद्विबोधितः ।। २

अहं कदाचिदाकाशकोशादवनिमागतः ।

भवत्पितामहार्थेन केनाप्युपनिमन्त्रितः ।। ३

विहरन्भूतलं गच्छंस्त्वत्पितामहपत्तनम् ।

प्राप्तोऽस्मि कामप्यादीर्घामरण्यानीं महातपाम् ।। ४

पांसुप्रतर्दनहतां प्रकचत्तप्तसैकताम् ।

अदृष्टापारपर्यन्तां क्वचिद्ग्राम किलाङ्किताम् ।। ५

अक्षुब्धस्वानिलालोकजलभूशान्तिशालिनीम् ।

ततां शून्यां महारम्भां ब्रह्मसत्तामिवामलाम् ।। ६

अविद्यामिव संमोहमृगतृष्णां गतां भ्रमात् ।

जडतामातता शून्यां दिङ्मोहमिहिकाकुलाम् ।। ७

अथ तस्यामरण्यान्यां यावत्प्रविहराम्यहम् ।

तावत्पश्यामि पुरतो वदन्तं पथिकं श्रमात् ।। ८

पान्थ उवाच ।

अहो नु परिखेदाय प्रौढप्रायातपो रविः ।

परितापाय पापोऽयं दुर्जनेनेव संगमः ।। ९

सुगलन्तीव मर्माणि स्फुरतीवाग्निरातपे ।

संकुचत्पल्लवापीडास्ताप्यन्ते वनराजयः ।। १०

तत्तावदेवमग्रस्थं ग्रामकं प्रविशाम्यहम् ।

श्रममत्रापनीयाशु वहाम्यध्वानमाशुगः ।। ११

इति संचिन्त्य सोऽग्रस्थं किरातग्रामकं यदा ।

प्रवेष्टुमिच्छति तदा मया प्रोक्तमिदं वचः ।। १२

अपरिज्ञातनीरागमार्ग मित्र शुभाकृते ।

मरुमार्गमहारण्यपान्थ स्वागतमस्तु ते ।। १३

चिरं मनुष्यदेशेऽस्मिन्निर्जनग्राममध्वनि ।

अधराध्वग विश्रातिं विश्रान्तोपि न लप्स्यसे ।। १४

ग्रामे विश्रमणं नैव वर्तते पामरास्पदे ।

तृड्वै लवणपानेन भूय एवाभिवर्धते ।। १५

एते ग्रामैकशरणाः पल्लवाः स्पन्दभीरवः ।

अयथापथसंचारा हरिणा इव जन्तवः ।। १६

न स्फुरन्ति विचारेषु प्रज्वलन्त्यनुभूतिषु ।

न त्रस्यन्ति दुराचारादश्मयन्त्रमया इव ।। १७

कामार्थरागसद्वेषपरिनिष्ठितपौरुषाः ।

कर्मण्यापातमधुरे रमन्ते दग्धबुद्धयः ।। १८

आभिजात्याततोदारा शीतला रसशालिनी ।

नेह विश्वसिति प्रक्षा मेघमाला माराविव ।। १९

वरमन्धगुहाहित्वं शिलान्तःकीटता वरम् ।

वरं मरौ पङ्गुमृगो न ग्राम्यजनसंगमः ।। २०

निमेषास्वादमधुराः क्षणान्तरविरागिणः ।

मारणैकान्तनिरता ग्राम्या विषकणा इव ।। २१

वान्ति भस्मकणाकीर्णा जीर्णाः संशीर्णसद्मसु ।

तृणपर्णवनव्यग्रा ग्राम्याधार्मिकवायवः ।। २२

एवमुक्तेन तेनाहमिदमुक्तस्ततोऽनघ ।

मद्वाक्येन समाश्वास्य स्नातेनेवामृताम्भसा ।। २३

पान्थ उवाच ।

भगवन्कोऽसि पूर्णात्मा महात्मा कथमात्मवान् ।

पश्यस्यनाकुलो लोकं ग्रामयात्रामिवाध्वगः ।। २४

किं त्वया पीतममृतं किं त्वं सम्राड्विराडथ ।

सर्वार्थरिक्तोऽपि चिरं संपूर्ण इव राजसे ।। २५

शून्योऽसिपरिपूर्णोऽसि घूर्णोऽसीव स्थिरोऽसि च ।

न सर्वमपि सर्वं च न किंचित्किंचिदेव च ।। २६

उपशान्तं च कान्तं च दीप्तमप्रतिघाति च ।

निवृत्तं चोर्जितं तादृग्रूपं किमिति ते मुने ।। २७

भूसंस्थोऽपि समस्तानां लोकानामुपरीव खे ।

संस्थितोऽसि निरास्थोऽसि घनास्थोऽसीव लक्ष्यसे ।। २८

प्रसृतं न पदार्थेषु न पदार्थात्मनाऽस्ति वै ।

तवेन्दोरिव शुद्धस्य मनोऽमृतमयं स्थितम् ।। २९

कलावानकलङ्कोऽन्तःशीतलो भास्वरः समः ।

रसायनभरापूर्णः पूर्णेन्दुरिव राजसे ।। ३०

त्वदिच्छायां तु सदसद्भावं पश्यामि ते चिति ।

संसारमण्डलमिदं स्थितं फलमिवाङ्कुरे ।। ३१

अहं तावदयं विप्र शाण्डिल्यकुलसंभवः ।

मङ्किर्नाम महाभाग तीर्थयात्राप्रसङ्गतः ।। ३२

गत्वा सुदूरमध्वानं दृष्ट्वा तीर्थानि संप्रति ।

चिरकालेन सदनमात्मीयं गन्तुमुद्यतः ।। ३३

न च मे गन्तुमुद्योगो विरक्तमनसो गृहम् ।

दृष्ट्वा तडित्सकाशानि भूतानि भुवनोदरे ।। ३४

भगवन्सत्यमात्मानं कथयेहानुकम्पया ।

गम्भीराणि प्रसन्नानि साधुचेतःसरांसि हि ।। ३५

दर्शनादेव मित्रत्वं कुर्वतां महतां पुरः ।

कमलानीव भूतानि विकसन्त्याश्वसन्ति च ।। ३६

ममेदं च मनो मोहात्संसारभ्रमसंभवम् ।

मन्ये हातुं न समर्थं स त्वं बोधानुकम्पितैः ।। ३७

श्रीवसिष्ठ उवाच ।

वसिष्ठोऽस्मि महाबुद्धे मुनिरस्मि नभोगृहः ।

केनाप्यर्थेन राजर्षेरिमं मार्गमुपस्थितः ।। ३८

मागा विषादं पन्थानमागतोऽसि मनीषिणाम् ।

प्रायः प्राप्तोसि संसारसागरस्य परं तटम् ।। ३९

वैराग्यविभवोदारा मतिरुक्तिरपीदृशी ।

आकृतिः शान्तरूपा च न भवत्यमहात्मनः ।। ४०

मणिर्मधुरकाषेण यथैति विमलात्मताम् ।

तथा कषायपाकेन चित्तमेति विवेकिताम् ।। ४१

किं ज्ञातुमिच्छसि कथं संसारं हातुमिच्छसि ।

उपदिष्टमहं मन्ये संपादयति कर्मभिः ।। ४२

विमलवासन उत्तममानसः

परिविविक्तमतिर्जनतेजसा ।

पदमशोकमलं खलु युज्यते

जनितितीर्षुमतेरिदमुच्यते ।। ४३

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मो० निर्वाणप्रकरणे उ० मङ्क्युपाख्याने मङ्किनिर्वाणं नाम त्रयोविंशः सर्गः ।।२३ ।।